## अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य । (४६/१६०)

[1]अकारादुत्तरस्य अनव्ययविसर्जनीयस्य [2]समासे अनुत्तरपदस्थस्य [3]नित्यं सकारादेशो भवति कृ कमि कंस कुम्भ पात्र कुशा कर्णी इत्येतेषु परतः । कृ – अयस्कारः । पयस्कारः । कमि – अयस्कामः । पयस्कामः । कंस – अयस्कंसः । [4]पयस्कंसः । कुम्भ – अयस्कुम्भः । [5]पयस्कुम्भः । अयस्कुम्भी, [6]पयस्कुम्भी इत्यत्रापि[7] भवति, 'प्रातिपदिकग्रहणे [8]लिङ्गविशिष्टस्यापि ग्रहणं भवति' (व्या. प. २९) इति । पात्र – अयस्पात्रम् । [9]पयस्पात्रम् । अयस्पात्री । [10]पयस्पात्री । कुशा – अयस्कुशा । [11]पयस्कुशा । कर्णी – अयस्कर्णी । [12]पयस्कर्णी । शुनस्कर्णः इत्ययं तु कस्कादिषु द्रष्टव्यः । अतः इति किम् ? गीःकारः । [13]धूःकारः । तपरकरणं किम् ? भाःकरणम् । भास्करः इत्ययं तु कस्कादिषु द्रष्टव्यः । अनव्ययस्य इति किम् ? [14]श्वःकारः । पुनःकारः । समासे इत्येव, [15]यशः करोति । [16]पयः करोति । [17]यशः कामयते । अनुत्तरपदस्थस्य इत्येव, [18]परमपयःकारः । परमपयःकामः ॥

## अधःशिरसी पदे । (४७/१६१)

अधस् शिरस् इत्येतयोः विसर्जनीयस्य समासे [19]अनुत्तरपदस्थस्य सकारः आदेशो भवति पदशब्दे परतः । अधस्पदम् । शिरस्पदम् । [20]अधस्पदी । शिरस्पदी । समासे इत्येव, अधः पदम् । अनुत्तरपदस्थस्य इत्येव, परमशिरःपदम् । अधस्पदम् इति मयूरव्यंसकादित्वात् समासः ॥

## कस्कादिषु च । (४८/१४४)

कस्क इत्येवमादिषु च विसर्जनीयस्य सकारः षकारो वा यथायोगमादेशो भवति कुप्वोः परतः । कस्कः । कौतस्कुतः । [21]कुत आगतः इत्यण् । भ्रातुष्पुत्रः । शुनस्कर्णः । सद्यस्कालः । सद्यस्क्रीः । क्रीणातेरयं सम्पदादित्वात् क्विप्[22] प्रत्ययः, तत्र भवः [23]क्रतुः साद्यस्क्रः । कांस्कान्, 'कानाम्रेडिते' (८.३.१२/१४३) इति रुत्वमत्र । सर्पिष्कुण्डिका, [24]धनुष्कपालम्, [25]बर्हिष्पूलम्, यजुष्पात्रम् इत्येषां पाठः उत्तरपदस्थस्यापि षत्वं यथा स्याद् इति । परमसर्पिःफलम् इत्येवमादि[26]प्रत्युदाहरणात् इति पारायणिका आहुः । भाष्ये वृत्तौ च 'नित्यं समासेऽनुत्तरपदस्थस्य' (८.३.४५/१५९) इत्यत्र परमसर्पिःकुण्डिका इत्येतदेव [27]प्रत्युदाहरणम् । अयस्काण्डः । मेदस्पिण्डः । अबिहितलक्षण उपचारः कस्कादिषु द्रष्टव्यः ॥

---

1. अकारान्तादुत्तरस्य इ. 2. समासोत्तरपदस्थस्य क. इ. 3. नित्यं नास्ति क. 4. यशस्कंसः इ. 5. पयस्कुम्भः नास्ति इ. 6. पयस्कुम्भी नास्ति इ. 7. भवति नास्ति क. 8. लिङ्गविशिष्टमपि क. 9. पयस्पात्रम् नास्ति इ. 10. पयस्पात्री नास्ति इ. 11. यशस्कुशा इ. 12. पयस्कर्णी नास्ति इ. 13. पूःकामः ह, नास्ति ब. क. 14. स्वःकारः क. इ. 15. यशस्करोति पयस्करोति यशस्कामयते इ. 16. पयः करोति नास्ति क. 17. वयः कामयते ह. 18. परमयशःकारः परमयशःकामः क. 19. अनुत्तरपदस्य क. 20. अधस्पदी नास्ति ह. 21. ततः ब. ड. ह. 22. प्रत्ययः नास्ति इ. 23. क्रतुः नास्ति क. इ. 24. चतुष्कपालम् 25. बर्हिष्पूलम् नास्ति ब. क. 26. प्रत्युदाहरणं षत्वं यथा स्यात् इति इ. 27. प्रत्युदाहृतम् इ.